प्रतिषिद्धे पूर्वपदप्रकृतिस्वर एव भवति। उपचारः–[1]उपपयःकारः, उपपयःकामः। [2]विसर्जनीयस्थानिकस्य सकारस्य उपचारः इति सञ्ज्ञा। [3]तत्राव्ययीभावस्याव्ययत्वे 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८.३.४६/१६०) [4]इति पर्युदासः सिद्धो भवति (म. भा. १.१८)। सर्वमिदं [5]काण्डं स्वरादावपि पठ्यते। पुनर्वचनमनित्यत्वज्ञापनार्थम्। तेनायं [6]कार्यनियमः सिद्धो भवति। इह च—'पुरा सूर्यस्योदेतोराधेयः' (का.सं. ८.३), 'पुरा क्रूरस्य विसृपो विरप्शिन्' (तै. सं. १.१.९.३) इति 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२.३.६९/६२७) इति [7]षष्ठीप्रतिषेधो न भवति॥

## शि[8] सर्वनामस्थानम्। (४२/३१३)

शि इत्येतत्[9] सर्वनामस्थानसञ्ज्ञं भवति। [10]किमिदं शि इति? [11]'जश्शसोः शिः' (७.१.२०/३१२) इति शिः आदेशः। कुण्डानि (७.१.७२/३१४) (६.४.८/२५०) तिष्ठन्ति। कुण्डानि पश्य(म. भा. १.१०)। दधीनि। मधूनि। त्रपूणि[12]। जतूनि। सर्वनामस्थानप्रदेशाः---'सर्वनामस्थाने चासम्बुद्धौ' (६.४.८/२५०) इत्येवमादयः॥

## सुडनपुंसकस्य। (४३/२२९)

[13]सुट् इति पञ्च वचनानि सर्वनामस्थानसञ्ज्ञानि भवन्ति नपुंसकादन्यत्र। नपुंसके न विधिः, न प्रतिषेधः। तेन [14]जसः शेः सर्वनामस्थानसञ्ज्ञा पूर्वेण भवत्येव[15]। राजा, [16]राजानौ, राजानः। राजानम्, राजानौ (६.४.८/२५०)। सुट् इति किम्? राज्ञः पश्य। अनपुंसकस्य इति किम्? सामनी, [17]वेमनी॥

## न वेति विभाषा। (४४/२४)

न इति प्रतिषेधः, वा इति विकल्पः। तयोः प्रतिषेधविकल्पयोः विभाषा इति [18]सञ्ज्ञा भवति। इतिकरणोऽर्थनिर्देशार्थः (म. भा. १.१०२)। विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते। तत्र प्रतिषेधेन समीकृते विषये [19]पश्चाद् विकल्पः प्रवर्तते। उभयत्रविभाषाः[20] प्रयोजयन्ति। 'विभाषा श्वेः' (६.१.३०/२४२०) शुशाव, शिश्वाय। शुशुवतुः, शिश्वियतुः[21]। विभाषाप्रदेशाः–'विभाषा श्वेः' (६.१.३०/२४२०) इत्येवमादयः॥

## इग्यणः सम्प्रसारणम्। (४५/३२८)

इक् यो यणः स्थाने भूतो भावी वा तस्य संप्रसारणम् [22]इत्येषा सञ्ज्ञा भवति। यज्[23]--इष्टम्। [24]वप्--उप्तम्। [25]ग्रह--गृहीतम्। केचिदुभयथा सूत्रमिदं व्याचक्षते वाक्यार्थः सञ्ज्ञी, वर्णश्च इति। इग्यणः [26]यो वाक्यार्थः[27]स्थान्यादेशसम्बन्धलक्षणः [28]स सम्प्रसारणसञ्ज्ञो भवति, [29]यण्स्थानिक इग्वर्णः स सम्प्रसारणसञ्ज्ञो भवति इति। तत्र विधौ वाक्यार्थ उपतिष्ठते-

---

1. नास्ति अ, उपचयःकारः, उपचयःकामः ह. 2. वाक्यमिदं नास्ति अ. 3. तत्र नास्ति ग, अत्र ह. 4. इत्यादिना ह. 5. कार्यम् ग. 6. अर्थकार्यनियमः ई. 7. षष्ठी नास्ति क. ड. 8. शिः क. ड. 9. शब्दरूपं ग. फ. ह. 10. वाक्यमिदं नास्ति अ. ब. क. 11. शिरिति जस्शसोः आदेशः ड, जसिशसोः ग. ह. 12. त्रपूणि, जतूनि न स्तः ग. 13. वाक्यमिदं नास्ति क. 14. जस्शसोः पूर्वेण सञ्ज्ञा भवति क. ह, जस्शसोः पूर्वेण सञ्ज्ञा सिद्धा ग. फ, जसः शेः पूर्वेण सञ्ज्ञा भवति ड. 15. एव नास्ति ग. 16. राजानौ नास्ति फ. 17. विमनी ई. 18. इति इयं ग. ह. 19. पश्चात् नास्ति फ. 20. विभाषां ह. 21. शुशुवुः ग, शिश्वियुः ग. फ. ह, शुश्रुवुः ह. 22. इत्येषा नास्ति क. ड. 23. यजि क, इष्टः ह. 24. वपि क. ड, उप्तः ह. 25. ग्रहि क. ड, गृहीतः ह, ग्रहीतः फ. 26. योऽयं क, यो वाक्यार्थः अयं ग. ह. 27. स्थान्यादेशसम्बन्धः अ. ग. ई, स्थान्यादेशः सम्बन्धी क. 28. स नास्ति फ. 29 यण्स्थाने इक् अ. ब. इ, यण्स्थानिक य इक् अ, यणः स्थानिकः ई.